## || श्री स्वामी समर्थ ||

---

## || बाला दुःस्वपनाशक कवचम् ||

---

विनियोग

ॐ अस्य श्री बाला परमेश्वरी कवचमन्त्रस्य ह्रौं महादेव ऋषिःह्रां ह्रीं ह्रूं |
ह्रैं ह्रः पङ्क्तिश्छन्दः, ऐं क्लीं ह्रीं श्रीं बाला परमेश्वरी देवता मम चतुवर्ग
फलप्राप्यर्थं सर्वविघ्न निवारणार्थं जपे विनियोगः ।

ध्यानम्

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम्।
पाशां कुशवराभीति धारयन्ती शिवां भजे॥

अथ कवचं

पूर्वस्यां भैरवी पातु बाला मां पातु दक्षिणे।
मालिनी पश्चिमे पातु वासिनी चोत्तरेऽवतु ॥
ऊर्ध्वं पातु महादेवी श्री बाला त्रिपुरेश्वरी ।
अधस्तात् पातु देवेशी पातालतलवासिनी ॥
आधारे वाग्भवं पातु कामराजस्तथा हदि ।
महाविद्या भगवती पातु मां परयेश्वरी॥
ऐं लं ललाटे मां पायात् ह्रीं ह्रीं हंसश्च नेत्रयोः ।
नासिका कर्णयोः पातु ह्रीं ह्रौं तु चिबुके तथा ॥
सौः पातु च गले मे हृदि ह्रीं ह्रः नाभिदेशके ।
सौः क्लीं श्रीं गुह्यदेशे तु ऐं ह्रीं पातु च पादयोः ॥

ह्रीं मां सर्वतः पातु सौः पायात् पदसन्धिषु ।
जले स्थले तथा कोशे देवराजगृहे तथा ॥
क्षें क्षें मां त्वरिता पातु मां चक्री सौः मनोभवा ।
ह्सौः पयात् महादेवी परं निष्कलदेवता ॥
विजय मङ्गलां दूती कल्पा मां भग्मलिनि
बाला मालिनि नित्या सर्वदा पातु मां शिवा
इतीदं कवचं देवी देवानामपि दुर्लभं
तब प्रित्या समाख्यातं गोप्नियम प्रयत्न्तः
इदं रहस्यं परमं गुह्याद् गुह्यतरं प्रिय ।
धन्यं प्रशयमायुष्यं भोगमोक्षप्रदं शिवम् ॥
दुःस्वप्ननाशनं पुंसां नरनारीवशं करम।
आकर्षणकरं देवि स्तम्भमोहकरं शिवे ॥
इदं कवचमज्ञात्वा श्री बाला त्रिपुरेश्वरीम।
यो जपेत् योगिनीवृन्दैः सभक्ष्यो नात्र संशयः ॥
न तस्य मंत्रसिद्धिः स्यात् कदाचिदपि शङ्करी ।
इह लोके स दारिद्र्यो दुःखरोगभयानि च ॥
निश्चयं नरकं गत्वा पशुयोनि भवाप्नुयात् ।
तस्मादेतत् सदाभ्यासादधिकारी भवेततः ॥
मत्पूर्वं निर्मितमिदं कवचं स पुष्यं।
पूजाविधेश्च पुरतो यदि वापरेण॥
रात्रौ च भोग ललितानि सुखानि भुक्त्वा ।
देव्याः पदं व्रजति तत्पुनरन्तकाले॥
॥ इति श्रीबाला दुःस्वप्ननाशक कवचम् ॥

॥ श्री गुरुदत्तात्रेयार्पणमस्तु ॥

|| श्री स्वामी समर्थार्पण मस्तु||